# ॥ नवग्रहध्यानम् ॥

# Navagraha Dhyānam

## श्रीगणेशाय नमः ।

**śrīgaṇeśāya namaḥ ||**

### अथ सूर्यस्य ध्यानं - त्रिपुरासर्वस्वे

**atha sūryasya dhyānaṁ - tripurāsarvasve**

प्रत्यक्षदेवं विशदं सहस्रमरीचिभिः शोभितभूमिदेशम् ।

**pratyakṣadevaṁ viśadaṁ sahasramarīcibhiḥ śobhitabhūmideśam |**

सप्ताश्वगं सद्ध्वजहस्तमाद्यं देवं भजेऽहं मिहिरं हृदब्जे ॥

**saptāśvagaṁ saddhvajahastamādyaṁ devaṁ bhaje'haṁ mihiraṁ hṛdabje ||**

### अथ चन्द्रस्य ध्यानं - निःसृतमागमे

**atha candrasya dhyānaṁ - niḥsṛtamāgame**

शङ्खप्रभमेणप्रियं शशाङ्कमीशानमौलिस्थितमीड्यवृत्तम् ।

**śaṅkhaprabhameṇapriyaṁ śaśāṅkamīśānamaulisthitamīḍyavṛttam |**

तमीपतिं नीरजयुग्महस्तं ध्याये हृदब्जे शशिनं ग्रहेशम् ॥

**tamīpatiṁ nīrajayugmahastaṁ dhyāye hṛdabje śaśinaṁ graheśam ||**

### अथ भौमस्य ध्यानं - आगमामृतमञ्जर्याम्

**atha bhaumasya dhyānaṁ - āgamāmṛtamañjaryām**

प्रतप्तगाङ्गेयनिभं ग्रहेशं सिंहासनस्थं कमलासिहस्तम् ।

**prataptagāṅgeyanibhaṁ graheśaṁ siṁhāsanasthaṁ kamalāsihastam |**

सुरासुरैः पूजितपादपद्मं भौमं दयालुं हृदये स्मरामि ॥

**surāsuraiḥ pūjitapādapadmaṁ bhaumaṁ dayāluṁ hṛdaye smarāmi ||**

## अथ सौम्यस्य ध्यानं - भैरवतन्त्रे

**atha saumyasya dhyānaṁ - bhairavatantre**

सोमात्मजं हंसगतं द्विबाहुं शङ्खेन्दुरूपं ह्यसिपाशहस्तम् ।

**somātmajaṁ haṁsagataṁ dvibāhuṁ śaṅkhendurūpaṁ hyasipāśahastam |**

दयानिधिं भूषणभूषिताङ्गं बुधं स्मरे मानसपङ्कजेऽहम् ॥

**dayānidhiṁ bhūṣaṇabhūṣitāṅgaṁ budhaṁ smare mānasapaṅkaje'ham ||**

## अथ जीवस्य ध्यानं - भैरवतन्त्रे

**atha jīvasya dhyānaṁ - bhairavatantre**

तेजोमयं शक्तित्रिशूलहस्तं सुरेन्द्रज्येष्ठैः स्तुतपादपद्मम् ।

**tejomayaṁ śaktitriśūlahastaṁ surendrajyeṣṭhaiḥ stutapādapadmam |**

मेधानिधिं हस्तिगतं द्विबाहुं गुरुं स्मरे मानसपङ्कजेऽहम् ॥

**medhānidhiṁ hastigataṁ dvibāhuṁ guruṁ smare mānasapaṅkaje'ham ||**

## अथ शुक्रस्य ध्यानं - कुब्जिकासर्वस्वे

**atha śukrasya dhyānaṁ - kubjikāsarvasve**

सन्तप्तकाञ्चननिभं द्विभुजं दयालुं पीताम्बरं धृतसरोरुहद्वन्द्वशूलम् ।

**santaptakāñcananibhaṁ dvibhujaṁ dayāluṁ pītāmbaraṁ dhṛtasaroruhadvandvaśūlam |**

क्रौञ्चासनं ह्यसुरसेवितपादपद्मं शुक्रं स्मरे द्विनयनं हृदि पङ्कजेऽहम् ॥

**krauñcāsanaṁ hyasurasevitapādapadmaṁ śukraṁ smare dvinayanaṁ hṛdi paṅkaje'ham ||**

## अथ शनेर्ध्यानं - शुभदमागमामृते

**atha śanerdhyānaṁ - śubhadamāgamāmṛte**

नीलाञ्जनाभं मिहिरेष्टपुत्रं ग्रहेश्वरं पाशभुजङ्गपाणिम् ।

**nīlāñjanābhaṁ mihireṣṭaputraṁ graheśvaraṁ pāśabhujaṅgapāṇim ।**

सुरासुराणां भयदं द्विबाहुं शनिं स्मरे मानसपङ्कजेऽहम् ॥

**surāsurāṇāṁ bhayadaṁ dvibāhuṁ śaniṁ smare mānasapaṅkaje'ham ।।**

## अथ सैंहिकेयस्य ध्यानं - वामकेश्वर तन्त्रे

**atha saiṁhikeyasya dhyānaṁ - vāmakeśvara tantre**

शीतांशुमित्रान्तकमीड्यरूपं घोरं च वैडुर्यनिभं विबाहुम् ।

**śītāṁśumitrāntakamīḍyarūpaṁ ghoraṁ ca vaiḍuryanibhaṁ vibāhum ।**

त्रैलोक्यरक्षाप्रदंमिष्टदं च राहुं ग्रहेन्द्रं हृदये स्मरामि ॥

**trailokyarakṣāpradammiṣṭadaṁ ca rāhuṁ grahendraṁ hṛdaye smarāmi ।।**

## अथ केतोश्च ध्यानं - तन्त्रसागरे

**atha ketośca dhyānaṁ - tantrasāgare**

लाङ्गुलयुक्तं भयदं जनानां कृष्णाम्बुभृत्सन्निभमेकवीरम् ।

**lāṅgulayuktaṁ bhayadaṁ janānāṁ kṛṣṇāmbubhṛtsannibhamekavīram ।**

कृष्णाम्बरं शक्तित्रिशूलहस्तं केतुं भजे मानसपङ्कजेऽहम् ॥

**kṛṣṇāmbaraṁ śaktitriśūlahastaṁ ketuṁ bhaje mānasapaṅkaje'ham ।।**

॥ इति नवग्रहध्यानं सम्पूर्णम् ॥

**।। iti navagrahadhyānaṁ sampūrṇam ।।**